**दिनाङ्क :- 10.10.2026**
**प्रातः - 06:55**

## अथवार्ताः

### पश्चिम-बङ्गालस्य-विधानसभा

पश्चिम-बङ्गालस्य नन्दीग्राम-रेजीनगर-विधानसभा-आसनयोः भाजपेतिदलेन बृहद्-मत-व्याप्त्या विजयः प्राप्तः। तथैव असम-राज्यस्य सामरिक-दृष्ट्या महत्त्वपूर्णे नगाँव-लोकसभा-आसने भाजपा-प्रत्याशी देवाशीष-शर्मा विजयी जातः।

तमिलनाडु-राज्ये मुख्यमन्त्री-सी.-जोसेफ-विजयस्य नेतृत्वे 'तमिलग-वेत्रि-कषगम्' (TVK) दलेन धारापुरम् तथा मधुरान्तकम् इति द्वे अपि विधानसभा-आसने विजित्य नूतनः कीर्तिमानः स्थापितः। अपरञ्च, पुदुच्चेरी-राज्यस्य 'थट्टञ्चावडी' आसने ए.आई.एन.आर.सी.-दलं स्वकीयम् आसनं सुरक्षितं कृतवत्।

### उपनिर्वाचन

उपनिर्वाचन-परिणामेषु भाजपा-एन.डी.ए.-गठबन्धनस्य प्रचण्डं विजयं प्रशंसयन् प्रधानमन्त्री श्रीनरेन्द्रमोदी अवोचत् यत् एषः जनादेशः सुशासन-नीतौ देशवासिनाम् अगाध-विश्वासं प्रकटीकरोति। अस्मिन् निर्वाचन-चक्रे पश्चिम-बङ्गालस्य नन्दीग्राम-रेजीनगर-आसनयोः, असमस्य नगाँव-संसदीय-क्षेत्रे च भाजपा-दलेन, तमिलनाडु-राज्ये 'तमिलग-वेत्रि-कषगम्' दलेन च ऐतिहासिकः विजयः प्राप्तः।

### दिल्ली पुलिस-लोक-सुरक्षा-चिन्तनात्

लोक-सुरक्षा-चिन्तनात्, पूर्व-नियम-निषेधाच्च दिल्ली-आरक्षि-संस्थया जन्तर-मन्तर-क्षेत्रे प्रस्तावितस्य प्रदर्शनस्य अनुमतिः नैव प्रदत्ता। महानगर्यां सुरक्षा-व्यवस्था अत्यन्तं कठोरा कृता अस्ति, पञ्चचत्वारिंशत् मेट्रो-स्थानकानि च पिहितानि सन्ति।

राष्ट्रिय-राजधान्यां शान्ति-व्यवस्थायाः रक्षार्थं दिल्ली-आरक्षि-प्रशासनेन स्पष्टीकृतं यत् विहितानां समयानाम् अभावात् जन्तर-मन्तर-क्षेत्रे प्रदर्शनस्य अनुमतिः प्रदातुं न शक्यते। क्षेत्रेस्मिन् भारतीय-नागरिक-सुरक्षा-संहितायाः त्रिषष्ट्युत्तरैकशत नियमानुसारं निषेधाज्ञा प्रवृत्ता वर्तते ।

सुरक्षा-कारणात् दिल्ली-मेट्रो-रेल-निगमेन राजीव-चौक, केन्द्रीय-सचिवालयम् समेत्य पञ्चचत्वारिंशत् मेट्रो-स्थानकानि पिहितानि। यातायात-नियन्त्रण-विभागेनापि मार्ग-परिवर्तनस्य मार्गदर्शिका प्रकाशिता अस्ति। प्रशासनेन नागरिकान् प्रति सुगम-गमनाय अग्रिम-मार्ग-निर्धारणस्य परामर्शः प्रदत्तः।

### पीएम-महिला-सम्मलेन

नवदेहल्यां महिला-बाल-विकास-मन्त्रालयस्य राष्ट्रिय-शिखर-सम्मेलनस्य समापन-सत्रे भाषणं कुर्वन् प्रधानमन्त्री श्रीनरेन्द्रमोदी किशोरीणां स्वास्थ्याय, पोषणाय, सर्वाङ्गीण-विकासाय च विशेष-ध्यानं दातुं समाहूतवान्। जन-सहभागिता-भावनावर्धनाय प्रधानमन्त्री प्रोक्तवान् यत् आंगनवाडी-केन्द्राणि केवलं प्रशासनिक-संस्थाः न भूत्वा सामाजिक-सहयोगस्य जीवन्त-केन्द्राणि भवेयुः।

**राष्ट्रपति**

साक्षात्कारात् परं वार्ताहरान् सम्बोधयन् कांग्रेस-दलस्य अध्यक्षः मल्लिकार्जुन-खडगे प्रोक्तवान् यत् विपक्ष-नेतारः 'विशेष-गहन-संशोधन' (SIR) प्रक्रयायाः कथित-विसंगतीनां विषये राष्ट्रपति-महोदयाम् ज्ञापितवन्तः। तैरपि निर्वाचन-यन्त्राणां (EVM) प्रयोगं समाप्य मतपत्रैः एव निर्वाचन-सम्पादनस्य याचना कृता।

**पत्र-सप्त**

मतदातृ-सूच्यां सामूहिक-आपत्तीनां रोधनाय निर्वाचन-आयोगेन 'प्रपत्र-सप्त' आवेदनस्य सीमा निर्धारिता। निर्वाचन-आयोगेन सर्वेषां-राज्यानां केन्द्रशासित-प्रदेशानां च मुख्य-निर्वाचन-अधिकारिणः प्रति प्रेषित-पत्रे स्पष्टीकृतं यत् प्रस्तावित-आपत्ति-अवधौ एकेन मतदात्रा अधिकतमेन दश प्रपत्राणि एव प्रस्तौतुं शक्यन्ते। तथैव सतत-नवीनीकरण-काले प्रतिमासं केवलं पञ्च आवेदनानि स्वीक्रियन्ते।अयं निर्णयः प्रत्यक्ष-अप्रत्यक्ष द्वयोः माध्यमयोः समान-रूपेण कार्यान्वितं भविष्यति, येन मतदातृ-सूच्यां दुर्भावनावशात् ऐक्येन बहु-संख्याका आपत्तयः रोद्धुं शक्येरन्।

**क्रिकट**

राँची-नगरे द्वितीये टी-२० प्रतिस्पर्धायां वेस्ट-इण्डीज-दलेन भारतं षड्-कन्दुकावपातैः विजित्य शृङ्खला एकं- एकम् इति समा कृता। द्विपञ्चाशत् उत्तर द्विशतधावाङ्कानां लक्ष्यं वेस्ट-इण्डीज-दलेन अष्टादश-चक्रेषु प्राप्तम्। तृतीया स्पर्धा श्वः इन्दौर-नगरे भविष्यति।

।। **इति वार्ता**:।।